

## अभ्यासात् जायते सिद्धिः

**१. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत**ः

(क) मित्राणि ग्रीष्मावकाशे कुत्र गच्छन्ति? – उत्तराखण्डम्

(ग) कः सर्वान् प्रेरयन् अवदत्? सुधीरः

(ङ) कपोतराजस्य नाम किम्? चित्रग्रीवः

(छ) विपत्काले विस्मयः कस्य लक्षणम्? कापुरुषस्य

(झ) चित्रग्रीवः हिरण्यकं कथं सम्बोधयति? सखे हिरण्यक !

(ख) सर्वत्र कः प्रसृतः? अन्धकारः

(घ) कः हितोपदेशस्य कथां श्रावयति? सुधीरः

(च) व्याधः कान् विकीर्य जालं प्रसारितवान्? तण्डुलकणान्

(ज) चित्रग्रीवस्य मित्रं हिरण्यकः कुत्र निवसति? गण्डकीतीरे । चित्रवने

(ञ) पूर्वं केषां पाशान् छिनत्तु इति चित्रग्रीवः वदति? मदाश्रितानाम्

Sukhvinder Kumar

**२. पूर्णवाक्येन उत्तरं लिखत—**

(क) यदा केदारक्षेत्रम् आरोहन्तः आसन् किम् अभवत्? यदा छात्राः केदारक्षेत्रम् आरोहन्तः आसन् तदा वेगेन वृष्टिः आरब्धा । सर्वत्र अन्धकारः प्रसृतः । नद्याः तीव्रजलवेगेन सेतुः भग्नः ।

(ख) सर्वे उच्चस्वरेण किं प्रार्थयन्त? – सर्वे उच्चस्वरेण प्रार्थयन्त – 'हे भगवन्! रक्ष अस्मान् रक्ष' इति ।

(ग) असम्भवं कार्यं कथं कर्तुं शक्यते इति नायकः उक्तवान्? आत्मविश्वासबलेन असम्भवम् अपि कार्यम् सम्भूय अवश्यं कर्तुं शक्यते ।



(घ) निर्जने वने तण्डुलकणान् दृष्ट्वा चित्रग्रीवः किं निरूपयति? "कुतोऽत्र निर्जने वने तण्डुलकणानां संभवः। तद् निरूप्यताम्। कश्चिद् व्याधोऽत्र भवेत्। सर्वथा अविचारितं कर्म न कर्तव्यम्।"

(ङ) किं नीतिवचनं प्रसिद्धम्? – लघूनाम् अपि वस्तूनां संहतिः कार्यसाधिका भवति इति नीतिवचनं लोकप्रसिद्धम्

(च) व्याधात् रक्षां प्राप्तुं चित्रग्रीवः कम् आदेशं दत्तवान्? — व्याधात् रक्षां प्राप्तुं चित्रग्रीवः कपोतान् आदेशं दत्तवान्।

(छ) हिरण्यकः किमर्थं तूष्णीं स्थितः? — हिरण्यकः कपोतानाम् अवपातभयात् चकितः तूष्णीम् स्थितः

(ज) पुलकितः हिरण्यकः चित्रग्रीवं कथं प्रशंसति? — हिरण्यकः अवदत्- "साधु मित्र! साधु! अनेन आश्रितवात्सल्येन त्वं त्रैलोक्यस्य अपि स्वामित्वं प्राप्तुम् योग्यः असि।"

(झ) कपोताः कथं आत्मरक्षणं कृतवन्तः? — कपोताः बुद्धिबलेन संघसामर्थ्येन च आत्मरक्षणं कृतवन्तः।

(ञ) नायकस्य प्रेरकवचनैः सर्वेऽपि किम् अकुर्वन्? – नायकस्य प्रेरकवचनैः सर्वे भयं, शोकं संदेहं च विहाय सेतुनिर्माणे संलग्नाः जाताः।

## ३. अधोलिखितानि वाक्यानि पठित्वा ल्यप्-प्रत्ययान्तेषु परिवर्तयत —

(क) छात्रः कक्षां प्रविशति। संस्कृतं पठति। ........ छात्रः कक्षां प्रविश्य संस्कृतं पठति ........।

(ख) भक्तः मन्दिरम् आगच्छति। पूजां करोति। ........ (आगत्य)

(ग) माता भोजनं निर्माति। पुत्राय ददाति। ........ (निर्माय)

(घ) सुरेशः प्रातः उत्तिष्ठति। देवं नमति। ........ उत्तिष्ठ्य

(ङ) रमा पुस्तकं स्वीकरोति। विद्यालयं गच्छति। ........ स्वीकृत्य

(च) अहं गृहम् आगच्छामि। भोजनं करोमि। ........ (आगत्य)

(छ) तण्डुलकणान् विकिरति। जालं विस्तारयति। ........ (विकीर्य)

(ज) व्याधः तण्डुलकणान् अवलोकते। भूमौ अवतरति। ........ (अवलोक्य)

## ४. उदाहरणानुसारम् उपसर्गयोजनेन क्त्वा-स्थाने ल्यप्-प्रत्ययस्य प्रयोगं कृत्वा पदानि परिवर्तयत —

सम्, आ, उप, उत्, वि, प्र

(क) छात्रः गृहं गत्वा भोजनं करोति। ........ छात्रः गृहम् आगत्य (आ+गम्+ल्यप्) भोजनं करोति ........।

(ख) माता वस्त्राणि क्षालयित्वा पचति। ........ प्रक्षाल्य (प्र+क्षाल्+ल्यप्)

(ग) शिक्षकः श्लोकं लिखित्वा पाठयति। ........ विलिख्य (वि+लिख्+ल्यप्)

(घ) रमा स्थित्वा गीतं गायति। ........ उत्थाय (उत्+स्था+ल्यप्)

(ङ) शिष्यः सर्वदा गुरुं नत्वा पठति। ........ प्रणम्य (प्र+नम्+ल्यप्)

(च) लेखकः आलोचनं कृत्वा लिखति। ........ संस्कृत्य (सम्+कृ+ल्यप्)

© NCERT not to be republished

